# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ३** | **गुणाः – ५०** |
| **विषयः – साहित्यम्** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १५/०७/२०२१** | **सन्दर्भग्रन्थः – रसगङ्गाधरः** | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः। प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्या कार्या।**

१ तत्र शृङ्गारो द्विविधः संयोगो विप्रलम्भश्च।

२ मलयानिलकालकूटयो रमणीकुन्तलभोगिभोगयोः।
श्वपचात्मभुवोर्निरन्तरा मम जाता परमात्मनि स्थितिः॥

३ प्रत्युद्गता सविनयं सहसा सखीभिः स्मेरैः स्मरस्य सचिवैः सरसावलोकैः।
मामद्य मञ्जुरचनैर्वचनैश्च बाले हा लेशतोऽपि न कथं वद सत्करोषि॥

४ तथा तत्तद्रसप्रस्तावनानर्हेऽवसरे प्रस्तावः विच्छेदानर्हे च विच्छेदः।

**प्रश्नः २** आचार्यजगन्नाथस्य रौद्ररसविषयकं मतं स्पष्टयत।

**प्रश्नः ३** हास्यरसं सोदाहरणं वर्णयत।

**प्रश्नः ४** रसानां विरोधाविरोधविषये समीक्षां कुरुत।

**प्रश्नः ५** रसदोषान् सविशदं विवेचयत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्या कार्या।**

१ उपक्रमादासमाप्ते रीत्यभेदः समता।

२ अवर्णितपूर्वोऽयमर्थः पूर्ववर्णितच्छायो वेति कवेरालोचनं समाधिः।

३ इष्टप्राप्त्यादिजन्मा सुखविशेषो हर्षः।

४ भावोदयो भावस्योत्पत्तिः।

**प्रश्नः ७** आचार्यजगन्नाथस्य मतानुसारं काव्यगुणान् चर्चयत।

**प्रश्नः ८** गुणरसयोः सम्बन्धं सविशदं वर्णयत ।

**प्रश्नः ९** व्यभिचारिभावान् स्पष्टयत ।

प्रश्नः १० रसाभासस्य सोदाहरणं चर्चां कुरुत ।

प्रश्नः ११ **दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ वीररसस्य प्रकारान् लिखत ।

२ करुणरसस्य उदाहरणं लिखत ।

३ 'चराचरजगज्जालसदनं वदनं तव । गलद्गगनगाम्भीर्यं वीक्ष्यास्मि हृतचेतना ॥'
इत्यत्र कः रसः ?

४ स्मितस्य लक्षणं किमस्ति ?

५ वीररसस्य विरोधिरसः कः ?

६ रसविरोधः कतिविधः ?

७ रससन्दर्भे स्थितिविरोधस्य उदाहरणं लिखत ।

८ रससन्दर्भे अनौचित्यं किमर्थं परिहरणीयम् ?

९ कः गुणः सर्वेषु रसेषु सर्वासु रचनासु च साधारणः ?

१० आचार्यवामनस्य मतानुसारं कति गुणाः सन्ति ?

११ माधुर्यगुणस्य लक्षणं लिखत ।

१२ व्रीडाव्यभिचारिभावस्य लक्षणं लिखत ।

१३ किं नाम भावशान्तिः ?

१४ भावसन्धेः उदाहरणं लिखत ।

१५ रसस्य कति भेदाः सन्ति ?

****